# पदच्छेदसम्बन्धिन्यः सूचनाः

## पदच्छेद चतुर्विधः -

प्रथमः

Input वंशानुचरितं चैव विस्तरेण महामुने ॥

Output वंशानुचरितं च+एव विस्तरेण महामुने ॥

अत्र मूले रिक्तस्थानाभावात् `+'चिह्नमात्रं योजितम् । रिक्तस्थानं न योजितम् ।

द्वितीयः

Input श्रोतुमिच्छाम्यहं त्वत्तो यथावदुपसंहृतिम् ॥

Output श्रोतुमिच्छाम्यहं त्वत्तः+ यथावदुपसंहृतिम् ॥

अत्र मूले रिक्तस्थानसद्भावात् `+'चिह्नमात्रं योजितम् । रिक्तस्थानं यथावत् रक्षितम् ।

तृतीयः

Input श्रोतुमिच्छाम्यहं त्वत्तो यथावदुपसंहृतिम् ॥

Output श्रोतुमिच्छाम्यहम्+ त्वत्तो यथावदुपसंहृतिम् ॥

अत्र मूले अनुस्वारः "म्+" इत्येवं रूपेण परिवर्तितः ।

चतुर्थः

Input कलेस्स्वरूपं भगवन्विस्तराद्वक्तुमर्हसि ॥

Output कलेस्स्वरूपं भगवन्+विस्तराद्वक्तुमर्हसि ॥

चतुर्थः वस्तुतः न व्याकरणसम्मतः सन्धिविच्छेदः। परन्तु पदविच्छेद एव । तथापि गणकीयसंस्करणाय (For word processing) एवंविधः विच्छेदः अपेक्षितः। अत्र मूले रिक्तस्थानाभावात् `+'चिह्नमात्रं योजितम् । रिक्तस्थानं न योजितम् ।

---

तिरुमल कुलकर्णी

# छेदः कुत्र न करणीयः ?

पदच्छेद-विषये विशेषरूपेण ध्यातव्यं यत् अत्र "पदस्य छेदः पदच्छेदः " अत्र पदम् इत्यत्र सुबन्तं तिङन्तं पदम् इत्येव स्वीक्रियते । यत्र नित्यरूपेण सन्धिः भवति तत्र छेदः न करणीयः एवमेव यत्र विवक्षाधीना सन्धिः भवति तत्रैव छेदः करणीयः । प्रमाणमत्र एषा कारिका : -

संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥

1. “एकपदे” सन्धिः न छेदनीया ।
   यथा :- रामश्शेते, अत्र रामः+शेते इति छेदः करणीयः।
   अत्र रामः एकपदम्, शेते इति द्वितीयम् पदम् ।
   रामः+शेते इत्यस्य पुनः "रामर्+शेते" अथवा "रामस्+शेते" इति न करणीयम् ।
   शब्दरूपे रामः इति शब्दः लभ्यते न तु रामर् अथवा रामस् इति लिख्यते ।
   अतः एकपदे छेदः न करणीयः ।
2. “धातु-उपसर्गमध्ये” सन्धिः न छेदनीया ।
   यथा :- “प्राप्नोति” अत्र प्र+आप्नोति इति न करणीयम् । किञ्च अत्र धातूपसर्गस्य प्रसङ्गः ।
   धातूपसर्गप्रसङ्गे संहिता नित्या भवति । अतः धातूपसर्गप्रसङ्गे छेदः न करणीयः ।
3. “समासे” सन्धिः न छेदनीया ।
   यथा :- “नीलोत्पलम्" इत्यत्र "नीलं च तत् उत्पलम्" इत्यस्ति समासच्छेदः ।
   नीलोत्पलम् इत्यत्र "नील+उत्पलम्" इति छेदः न करणीयः । कारणम् समासे
   संहिता नित्या भवति। अतः समासे छेदः न करणीयः

## यान्त्रिकानुवाददृष्ट्या विशेषः

4. “चित्, चन" सन्धिः न छेदनीया
   यथा :- "किञ्चित्" "कथञ्चित्" "कुतश्चित्" अथवा "किञ्चन" "कथञ्चन" "कुतश्चन" इत्यादिषु स्थलेषु “चित्, चन” अनयोः शब्दयोः पृथगर्थः नास्ति। अतः "किम्+चित्" अथवा "किम्+चन" अनेन प्रकारेण छेदः न करणीयः।

5. “यद्यपि, तथापि, केऽपि, कापि" सन्धिः न छेदनीया
   यथा :- "यद्यपि" “तथापि" "केऽपि" “कापि" इत्यादिषु स्थलेषु "यदि, तथा, के, का" एतेषाम् स्वातन्त्र्येण अर्थः भिन्नः परन्तु "अपि" इत्यनेन सह अर्थः भिन्नः अतः एतादृशेषु स्थलेषु छेदः न करणीयः।

---

देवानन्द शुक्ल 08-04-09